उपशास्त्री - II साहित्य तृतीय - पत्रम्
किरातार्जुनीयम - प्रथमः सर्गः

परिभ्रमंल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ॥

उत्तरम् - प्रसंगः — प्रस्तुतोऽयं श्लोकः कविशिरोमणि महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके युधिष्ठिरं प्रति द्रौपद्याः उक्ति —

व्याख्या — लोहितचन्दनोचितः = रक्त चन्दनके योग्य (शरीरवाला), महारथः = बड़े-बड़े रथोंमें चलनेवाला। अयं वृकोदरः = यह भीमसेन। रेणुरूषितः (सन्) = धूलसे रूखे शरीरवाला होकर, पदातिः = पैदल ही, अन्तर्गिरि = पहाड़ोंके अन्दर। परिभ्रमन् = घूमता हुआ। सत्यधनस्य = सत्यको ही धन माननेवाले (आपके)। मानसं = चित्तको। नो दुनोति कच्चित् = दुःखित नहीं करता है क्या।

भावार्थः - रक्तचन्दनाङ्गरागाभ्यासो महारथचारी चायं भीमसेनः साम्प्रतं धूलिधूसरितः सन् पदातिरेव पर्वतान्तरेषु पर्यटति, अनेनापि सत्यप्रियस्य तव मानसं न किञ्चिदपि परितप्यते किम्।

Renu Devi
12/09/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.

उपशास्त्री – I साहित्य – तृतीय - पत्रम्

# किरातार्जुनीयम्

## प्रथमः सर्गः

Date ___/___/______

विधाय रक्षान्परितः परेतरानशंकिताकारमुपैति शंकितः।
क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः॥

उत्तरम् – प्रसंगः – प्रस्तुतोऽयं श्लोकः कविशिरोमणि महाकवि भारवि प्रणीतस्य किरातार्जुनीयम् महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके युधिष्ठिरं प्रति वनेचरस्य उक्ति –

व्याख्या – स निरन्तरमविश्वस्तः सन्नपि सर्वतः आत्मीयान् रक्षकान् नियोज्य अशङ्कितवद्व्यवहारति, कार्यान्तेषु भृत्याधीना कृताः प्रचुराः सम्पदः तस्योपकारज्ञत्वं कथयन्ति, अर्थात् ताभिस्तस्योपकारित्वं प्रतीयते।

पदार्थ – सः = वह (दुर्योधन) शङ्कितः (सन्) = (आप से) शंकित रहता हुआ, परितः = सब ओर से, परेतरान् = आत्मीय जनों को, रक्षान् विधाय = रक्षक नियुक्त करके। अशङ्किताकारम् = निःशङ्कस्वभाव को, उपैति = प्राप्त होता है। क्रियापवर्गेषु = कार्यों की समाप्ति पर, अनुजीविसात्कृताः = सेवकों को सौंपी हुई, सम्पदः = सम्पत्तियाँ, अस्य = इसकी, कृतज्ञता = कृतज्ञभाव को, वदन्ति = कहती है।

Renu Devi
12/09/20
राधा उमाकांत सं० महावि० सुरवसेना, पूर्णिया।

शास्त्री-II रत्नावली-नाटिका
नाटकीयाः परिभाषा

Saathi

Date ___/___/___

नाटिका — नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥
स्यादन्तःपुरसम्बद्धा संगीतव्यापृताऽथवा ।
नवानुरागा कन्याऽत्र नायिका नृपवंशजा ॥

अङ्कः — प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः ।
भवेद् गूढशब्दार्थः क्षुद्रचूर्णकसंयुतः ॥
नानेकदिननिर्वर्त्य कथया सम्प्रयोजितः ।
आवश्यकानां कार्याणामविरोधाद्विनिर्मितः ॥
प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः ।
अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्तितः ॥

नान्दी — आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥

सूत्रधारः — नाट्योपकरणादीनि सूत्रमित्यभिधीयते ।
सूत्रं धारयते यस्तु सूत्रधारः स उच्यते ॥

Renu Devi
12/09/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

शास्त्री-I साहित्य

अभिज्ञानशाकुन्तलम्

षष्ठोऽङ्कः

Date __/__/____

एकैकमत्र दिवसे दिवसे मदीयं नामाक्षरं गणय गच्छति यावदन्तम्। तावत्प्रिये मदवरोधगृहप्रवेशं नेता जनस्तव समीपमुपैष्यतीति ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यकाव्यस्य षष्ठोऽङ्कात् उद्धृतोऽस्ति।

अस्मिन् श्लोके राजा दुष्यन्तः स्वनामाङ्कितमुद्रायाः शकुन्तलाहस्तगमने वृत्तान्तं विदूषकं प्रति प्रकाशयति -

व्याख्या- हे सखे माधव्य! कण्वतपोवने गान्धर्वविवाहानन्तरं निजराजधान्यै प्रस्थितं मां प्रिया शकुन्तला अश्रुपूर्णं लोचनं विधाय मामपृच्छत् यत् कतिभिर्दिनैः आर्यपुत्रः स्वसन्देशं दास्यति। ततो मया इदमङ्गुलीयकं तदङ्गुलौ परिधापयता सा प्रोक्तं प्रिये! अत्राङ्कितं मन्नामाक्षरं प्रत्यहमेकैकमक्षरं गणय यावदेव मन्नामक्षराणामन्त्यं दु-ष-य-न-न्त इत्यत्र तकारं गमिष्यति तावत् कालं कश्चन मदीयः कुलीनः राजपुरुषः त्वदन्तिकमागत्य त्वां स बहुमानं ममावरोधं प्रापयिष्यसीत्येवं मया साभिहिता। तदनन्तरं राजधानीमुपेत्य हतबुद्धिना मया न कश्चनात्मीयो जन तत्समीपे प्रहितः। तत्रापि चिरं प्रतीक्ष्य तातेन महर्षिणा कण्वेन सरलहृदया सा स्वयमेव मे समीपे समुपस्थापिता परं मतिभ्रमात् मया तदानीं सा प्रत्याख्याता सांप्रतमङ्गुलीयक दर्शनेन लब्ध स्मृतिः एवं विलपामि। अत्र काव्यलिंगमलंकारः वृत्तं च वसन्ततिलका।

Renu Devi
12/09/20

राधाउमाकान्त सं० महावि० सुरवसेना, पूर्णिया।

Page No. ____